# माहेश्वरसूत्रेषु रामकथा

● प्रज्ञाचक्षुः जगद्गुरुः रामभद्राचार्यः
चित्रकूटम् (म० प्र०)
● सम्पादकः – नित्यानन्दमिश्रः

माहेश्वराणि चतुर्दश सूत्राणि व्याकरणशास्त्रे ख्यातानि । वर्णसमाम्नायज्ञापनपरेषु प्रत्याहारप्रयोजनकेषु तेषु रामकथा अपि सङ्केतिता अस्ति ।

व्याकरणमूलभूतायां माहेश्वर्यां चतुर्दशसूत्र्यां समासतो रामकथा कथिता अस्ति । एतत् कथनं बहून् आश्चर्यान्वितान् कुर्यात् । अतः स च अंशः अत्र निरूप्यते विस्तरेण ।

तत्र द्विचत्वारिंशदक्षराणां सङ्ग्रहो यश्च भगवतः श्रीरामस्य द्विचत्वारिंशद्वर्षीयचरित्रं ध्वनयति । जन्मतो विवाहं यावद् द्वादशाब्दावधिः, ततो द्वादश वर्षाणि यावद् अयोध्यायां वासः, पञ्चविंशे वर्षे सीतालक्ष्मणाभ्यां सह वनगमनं, चतुर्दशाब्दं यावद् अरण्यचरित्रं मैथिलीहरणरावणसंहरणादिकम्, अन्तिमवर्षे राज्यलीला इति मिलित्वा ऊनचत्वारिंशत् वर्षाणि । वर्षत्रयं राज्यव्यवस्थायाम् । एषु मुख्यं रामायणम् । अक्षरस्य ब्रह्मणः श्रीरामस्य दिव्या चर्चा सूत्रबद्धाक्षरैः सङ्केतिता ।

चतुर्दशसूत्र्यां विभागद्वयं – स्वरवर्गो व्यञ्जनवर्गश्च इति । स्वराणां चर्चा चतुर्भिः सूत्रैः व्यञ्जनानाञ्च चर्चा दशभिः सूत्रैः व्यधायि । अत्रापि रामकथायां विभागद्वयं – निर्गुणलीलायाः सगुणलीलायाश्च इति । ऐश्वर्यस्य माधुर्यस्य वा । ऐश्वर्यं चत्वारि फलानि ददाति । अतः चतुर्भिः सूत्रैः तत्सङ्केतः सङ्गच्छते । ऐश्वर्यञ्च स्वरस्थानापन्नम् । अतः स्वरैः कथ्यते । स्वेन राजते स्वयं रमते वा स्वरः । स्वराः ये खलु उच्चारणे किमपि वर्णान्तरं न अपेक्षन्ते । तथैव ईश्वरः अनपेक्षकोऽपि स्वस्मिन् महीयते । स्वराणां सङ्ख्या नव । राघवस्य च प्रादुर्भावो नवम्याम् । यथा वाल्मीकीये –

> ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।
> ततस्तु द्वादशे मासे चैत्रे नावमिके तिथौ ।। –वा.रा. १-१८-८

नवमी सङ्ख्या श्रेष्ठा पूर्णा च । एतस्याः वरीयसी कापि सङ्ख्या नास्ति । आद्यन्तनिर्वाहिका सर्वथा गुणिताऽपि पूर्वपरसम्मेलनेन नवैव । यथा द्विगुणिता नव सङ्ख्या अष्टादशताम् उपैति । सा च दक्षिणे एकं वामेऽष्टाविति लेखनात् भवति । सम्मेलनेन द्वयोः पुनर्नव । एवं त्रिगुणिता सप्तविंशतिः । सा च दक्षिणे द्वौ वामे सप्त इति लेखनात् भवति । सम्मेलनेन द्वयोः पुनर्नव । एवम् अन्यत्रापि । यथा सर्वथा गुणिताऽपि नवमी सङ्ख्या द्वयोर्योगेन नवत्वं न जहाति, तथैव नवभिः स्वरैः सङ्केत्यो भगवान् गुणितोऽपि अर्थाद्भक्तेच्छया जनवत्सलत्वकारुणिकत्वकृपालुत्वप्रणतानुरागित्वभक्तेच्छापालकत्वदीन-बन्धुत्वसरलत्वसफलत्वस्वामित्वरघुनाथत्वप्रभृतिभिः दशभिः गुणैः गुणितोऽपि नवमी सङ्ख्या इव ऐश्वर्यं न त्यजति । नवमीतोऽधिका काऽपि सङ्ख्या नहि । तथैव रामतोऽधिकः कोऽपि देवो नास्ति । नवमी सङ्ख्या पूर्णा, श्रीरामोऽपि पूर्णः । ऐश्वर्यलीलायां चतुष्पाद्विभूतिदर्शनम् । विभूतेश्चत्वारः पादा यथा –

> एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः ।
> पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।
> त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
> ततो विश्वङ्व्यक्रामत्साशनानशने अभि ।। –शु.य.वा.मा. ३१-३,४

चतुष्पाद्विभूतेः भगवतः चतुर्भिः सूत्रैः विभूतिभूषणेन ढक्कामाध्यमेन गानम् अतिन्यायसङ्गतं युक्तियुक्तञ्च । ऐश्वर्यलीलायां श्रीरामस्य मिलन्ति चत्वारि सूत्राणि । विकारैः सह विग्रहः, फलानां निग्रहः, कारुण्यादीनां सङ्ग्रहः, निजपादपद्मप्रपन्नभक्तेषु अनुग्रहश्च । इदमपि चतुस्सूत्रैः स्वरूपश्रीरामैश्वर्ये लीलाप्रतिपादने तात्पर्यम् ऊह्यम् । चतुर्णाम् आर्तजिज्ञासु-अर्थार्थिज्ञानिभक्तेषु अनुग्रहश्च अस्मिन् तथ्ये दृढीकरणम् आपादयति । चत्वारो हि भगवतो भक्ताः – आर्तः, जिज्ञासुः, अर्थार्थी, ज्ञानी चेति ।

(१) आर्तः – आर्तिग्रस्तः चतुर्णामपि पुरुषार्थानां लिप्सया परमात्मानं प्रपद्यते, यथा विभीषणः ।

(२) जिज्ञासुः – ज्ञातुम् इच्छुः अर्थाद् धर्ममोक्षलिप्सया श्रीरामं शुश्रूषते, यथा लक्ष्मणः ।

(३) अर्थार्थी – भगवन्तं राघवम् अर्थकामौ प्रार्थयते, यथा सुग्रीवः ।

(४) ज्ञानी – ज्ञानं प्राप्य पूर्वं तु मोक्षम् इच्छति । विशेषो विज्ञानिरूपो निष्कामो हृदि रामं रमयितुमेव सदा चेष्टते, यथा जटायुः हनुमान् च ।

ऐश्वर्यलीलायाम् अमीषु चतुर्षु कृपाऽतोऽपि चतुर्भिः सूत्रैः प्रतिपादनं सङ्गच्छते । ऐश्वर्यलीलायां चतस्रः मुख्याः घटनाः – कौसल्यासमक्षं विराड्रूपप्रदर्शनम्, अहल्योद्धारः, परशुराम-समक्षं वैष्णवधनुःकर्षणं, रावणवधश्च । अतोऽपि चतुर्भिः सूत्रैः स्वरच्छलेन ऐश्वर्यांशवर्णनं रमणीयं प्रतिभाति । नव स्वराः, तथैव ऐश्वर्यलीलापि श्रवणकीर्तनादिनवलक्षणां भक्तिं ददाति । नवधा भक्तिः भगवतानुसारणेन इत्थम् –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।
– भा.पु. ७-५-२३

एवम् ऐश्वर्यलीलाऽपि नवविधा । तत्र ऐश्वर्यं धर्मो यशः श्रीर्ज्ञानं वैराग्यं निग्रहो विग्रहोऽनुग्रहश्च इति । अत एव नव-स्वरात्मकनवैश्वर्यलीलानां चतुर्भिः सूत्रैः प्रतिपादनं सुस्पष्टमेव रामायणस्य ऐश्वर्यवर्णनम् । तत्र –

(१) अइउण् – अकारो वासुदेवः ।

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः ।।
– भ.गी. १०-३३

इत्थम् अः श्रीरामो वासुदेवः । इः महालक्ष्मीः सीता । उः जीवाचार्यो लक्ष्मणः । ण् निर्वृतिवाचकः । णश्च निर्वृति-वाचकः इति गोपालतापनीयश्रुतेः । अर्थाद्रामसीतालक्ष्मण-ध्यानेन जीवो भवबन्धनात् निवर्तते इति सूत्रार्थः ।

(२) ऋऌक् – ऋ ऋषिः । ऌ ऌकारवत् जटिलसाधनारतो मुनिः । तावेव कथयति आत्मसम्मुखं करोतीति ऋऌक् । एवं पूर्वसूत्रेऽपि अकारेकारोकारवाचकान् रामसीतालक्ष्मणान् नयति प्रापयति इति णीञ्धातोः (णीञ् प्रापणे – धा.पा. ९०१) अइउण् इत्यपि ।

(३) एओङ् – ए षडैश्वर्यवाचको रामः । ओ सप्तावरण-नाशिनी सीता । तौ अञ्चति पूजयति इति एओङ् । सीताराम-पूजकमिति तात्पर्यम् ।

(४) ऐऔच् – ऐ अष्टप्रकलात्मिका सीता । औ नवम-सङ्ख्यावाच्यो रामः । तौ चिनोति अन्तर्भावितण्यर्थतया निश्चाययति इति ऐऔच् । सीतारामनिश्चायकम् इत्यर्थः ।

इत्थं सूत्रचतुष्टयेन ऐश्वर्यलीलात्मकं रामायणं प्रति-पादितम् । इदानीं माधुर्यलीलापरं रामायणं बालबुद्ध्या विविच्यते दशभिः सूत्रैः । तत्र माधुर्ये पूर्वनिर्दिष्टदशगुण-प्रतिपादकानि दश सूत्राणि दशमस्त्वमसि इति श्रुतेः वाच्यतावच्छेदकस्य लक्ष्यतावच्छेदकस्य भगवतः श्रीरामस्य माधुर्यगुणबृंहितं सौन्दर्यसारसर्वस्वं दिव्यं चरित्रं शिवेन लोकोत्तरकौशलपुरःसरं सङ्केतितम् ।

अत्र वर्णानां द्वौ विभागौ – स्वरो व्यञ्जनञ्च । एवमेव ब्रह्मणो द्वे स्वरूपे – निर्गुणं सगुणञ्च । तत्र निर्गुणलीला प्रतिपादिता । साम्प्रतं सगुणलीलाऽपि प्रतिपाद्यते । पञ्चमात् सूत्राद् व्यञ्जनानां वर्णनं प्रारब्धम् । तत्र व्यञ्जनं सीतायाः रामेण मिश्रणम् । सगुणलीलायां सीतया रामोऽभिन्नः । यथा –

अनन्या राघवेणाहं भास्करेण यथा प्रभा ।।
–वा.रा. ५-२१-१५

अनन्या हि मया सीता भास्करेण यथा प्रभा ।।
– वा.रा. ६-११८-१९

इति वाल्मीकीये रामायणे श्रीसीतारामाभ्याम् उक्तत्वात् । उभयत्र तृतीया प्रकृत्यादित्वात् । व्यञ्जनानां षड्वर्गाः – यवर्गः कवर्गः चवर्गः टवर्गः तवर्गः पवर्गश्च इति । एषां कीर्तनेन जीवानां विकारषड्वर्गनाशनं सूचितम् । किं बहुना, स्वरवर्गम् अपि संयोज्यते चेत् चतुर्दशसु सूत्रेषु सप्त वर्गाः । एवं सप्तभिः वर्गैः अक्षराणां सप्तकाण्डात्मकं रामायणं सुस्पष्टं कीर्तितम् । सूत्राणि सार्वभौमानि विश्वतोमुखानि छन्दःस्वरूपाणि भवन्ति । तत्र स्थूलानाम् अक्षराणां निर्देशत्वेऽपि अक्षराणाम् अक्षरस्य भगवतो रामचन्द्रस्य रामायणी गाथा कथं न निर्दिष्टा स्यात् । भगवत्सङ्कीर्तनं विना एषु पुण्यजनकतावच्छेदकता कथं स्यात् । यतो रामायणकीर्तनं चतुर्दशभुवनव्यापकं चतुर्दश-सूत्रेषु अतो लोकोत्तरपुण्यजनकता । तस्माद् भाष्यकारः चतुर्दशानां सूत्राणां सानन्दं प्रशंसां कुर्वन्नाह – 'सोऽयमक्षर-समाम्नायो वाक्समाम्नायः पुष्पितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः । सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति' (भा.शि.सू.) । तर्हि ब्रह्मणो रामस्य चर्चां विना पूर्वोक्तपुण्यजनकता अन्येषु सन्दिग्धा स्यात् । यतो भाष्य-प्रमाणम्, यया पुण्यजनकता, यतश्च पुण्यजनकता । पूर्वं चतुर्भिः सूत्रैः बालकाण्डं चर्चितम् । इदानीम् अयोध्याकाण्डम् उपक्रमते ।

(५) हयवरट् – वर्णसंयोजनेन हयेषु घोटकेषु वरा हयवराः श्रेष्ठघोटकाः तैः अटति वनमिति हयवरट् । अथवा हयवर-संयोजितरथेन पित्रा आदिष्टः सीतालक्ष्मणसहायः श्रीरामो वनम् अटतीति हयवरट् । शकन्ध्वादित्वात् पररूपं सौत्रत्वाद्वा ।

(६) लण् – लसतीति लः । सौत्रत्वात् टिलोपः । तस्मिन् ले प्रकृतिसौन्दर्यलसिते चित्रकूटे भक्तान् आनन्दं नयतीति कष्टात् निवर्तयति वेति लण् चित्रकूटस्थो रामः । सौत्रत्वात् णत्वम् ।

यद्वा लाति भक्तिं यः सः लः चित्रकूटः, तस्मिन् नाशयति भक्तकष्टं जयन्तदर्पञ्च यः सः लण् चित्रकूटस्थः श्रीरामः । सौत्रत्वातत् टिलोपो णत्वञ्च ।

(७) ञमङणनम् – प्रतिवर्गान्तिमभूतान् खरदूषणत्रिशीर्ष-मारीचकबन्धान् मीनातीति ञमङणनम् श्रीरामः ।

(८) झभञ् – झीर्यतीति झः । सुग्रीवः । वालित्रासात् जीर्णो भवतीति भावः । झॄ वयोहानौ (धा.पा. १४९४)। भातीति भः । हनुमान् । तौ झभौ सुग्रीवहनुमन्तौ यमयति आनन्देन इति झभञ् श्रीरामः । सुग्रीववायुपुत्रतोषकर्ता इति तात्पर्यम् । सौत्रत्वात् यकारस्य ञकारः ।

(९) घढधष् – घढमभिमानं दधातीति घढधः वाली । तमेव स्यति खण्डयतीति घढधष् । वालिनाशको रामः इति तात्पर्यम् ।

(१०) जबगडदश् – जयतीति जः । बालयतीति बः । गर्जतीति गः । डम्बयतीति डः । दमयति निशाचरान् इति दः । एतत्पञ्च-गुणसम्पन्नजबगडदस्य हृदये शेते इति जबगडदश् । वायुपुत्र-हृदयस्थो रामः ।

(११) खफछठथचटतव् – खनतीति खः । फलतीति फः । छ्यतीति छः । लुठतीति ठः । (लुकारलोपश्छान्दसः) चिनोति दुर्गुणान् इति चः । टङ्कयति असद्विचारान् इति टः । ताम्यतीति तः । एवं रावणम् अपि वधति (हन्ति) खफछठथ- चटतव् । अथवा खफछठथचटतध्वनिं कुर्वाणं युद्धाय स्वकीयं चापविशेषं वर्धयति इति खफछठथचटतव् । अथवा एतद्गुनियुक्तं वानरदलम् अवति इति खफछठथचटतव् ।

(१२) कपय् – कायति विभीषणं राज्यदानाय शब्दापयति, पाति वानरसेनां पुष्पकारोहेण, याति अयोध्यामिति कपय् । दत्तविभीषणराज्यलक्ष्मीकः पुष्पकारूढः सीताभिरामो रामः अयोध्यां प्रति प्रतिष्ठते इति भावः ।

(१३) शषसर् – श्यति रावणं, स्यति तनूकरोति सीतातापं, सरति अयोध्यां, रमयति सीतां, रमते च स्वयं, राजते वा राजसिंहासने यः सः शषसर् । रावणवधं विधाय राजसिंहासनासीनो रामः इति तात्पर्यम् । सौत्रत्वात् सकारस्य षकारः ।

(१४) हल् – हरति भक्ततापं, लिङ्गति यः सीतां, लिङ्ग्यते वा सीतया, लीयते वा भक्तानां हृदि यः स हल् ।

इति बालबुद्धिप्रतिपादितव्युत्पत्तिपरक-चतुर्दशसूत्री रामायणकथा ।

हकारेण प्रारभ्य हकारेण एव उपसंहारः अपवर्गस्य उभयत्र चर्चया चतुर्दशसूत्र-रामायणम् अपवर्गाय इति ध्वन्यते । एवमेव नवभिः स्वरैः नवसङ्ख्यावाच्यपूर्णब्रह्म-श्रीरामस्य चर्चां विधाय पुनरेकत्रिंशद्वर्णैः रावणवधकाले भगवता धनुषि संहितानां रामस्य एकत्रिंशतः बाणानां स्मरणेन एकत्रिंशद्विकारनाशोऽपि सूचितः । पुनर्द्वाभ्यां वर्णाभ्यां श्रीसीताराम-स्मरणेन ज्ञानिनां मोक्षो भक्तानां भक्तिश्च सूचिता । व्यञ्जनेषु हकारेण प्रारभ्य हकारेण उपसंहारस्य तात्पर्यं यत् हकारः हरिवाचको हरिश्च पापानि हरत्यतः पूर्वम् अइउण् इत्यत्र अकारेण वासुदेवस्य रामस्य स्मरणं, मध्ये हकारेण हरिस्मरणम्, अन्ते च हकारेण हरिस्मरणम् इत्यादौ मध्ये अन्ते च मङ्गलाचरणं सङ्केत्य रामायणी


## आध्यत्मरामायणे अपाणिनीयप्रयोगाणां विमर्शः



प्रज्ञाचक्षुः
**जगद्गुरुः रामभद्राचार्यः**

सम्पादकः –
नित्यानन्दमिश्रः

प्रकाशनम् –
Shri Tulsi Peeth Seva Nyas
Aamodavana, Post Naya Gaon
Chitrakoot, Satna – 485331
(Madhya Pradesh, India)
Tel: +91-7670-265478
E-mail : namoraghavay@gmail.com
http://jagadgururambhadracharya.org

लेखोऽयं यस्मात् उद्धृतः तस्य पुस्तकस्य नाम 'आध्यत्मरामायणे अपाणिनीयप्रयोगाणां विमर्शः' इति । पुस्तकस्यास्य नाम एव सूचयति – किंसम्बद्धम् एतत् पुस्तकम् इति । पुस्तकस्यास्य विस्तृतायां प्रस्तावनायां लेखोक्तः अंशः चर्चितः । वाचकानाम् उपयोगाय तावन्तमेव भागं पृथक्कृत्य लेखत्वेन प्रकाशयन्तः स्मः वयम् । रामभद्राचार्यवर्यस्य पूर्वाश्रमनाम 'आचार्यः गिरिधरलालमिश्रः प्रज्ञाचक्षुः' इति । तदीयः शोधप्रबन्धः (पि.एच्डि.पदव्यै सज्जीकृतः) अयम् । ग्रन्थाद्यन्यसाहाय्यं विना अखण्डतया वदता त्रयोदशदिनाभ्यन्तरे तेन एतत् लेखितम् इति श्रूयते । भृङ्गदूतम्, भार्गवरामायणम्, गीतरामायणम् इत्यदयः कृतयः तेन विरचितेषु शताधिकेषु कृतिषु अन्यतमाः । पद्मविभूषणादिभिः अनेकाभिः प्रशस्तिभिः विभूषितः अस्ति सः ।

मर्यादापि सुरक्षिता । तथा चोक्तम् -

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ।।

- क.पु. २१-३७

अकारम् उद्दिश्य श्रीरामस्मरणतः प्रारभ्यान्ते हल् इति लकारेण लक्ष्मणः स्मृतः ।

यद्यपि चतुर्दशानां सूत्राणां द्विरुच्चारितहकारस्य सन्ति विविधेषु प्रयोगेषु प्रयोजनानि, यथा हयवरट् इत्यत्र हकारः अट् हश् अश् इण् ग्रहणेषु सूत्रेषु हकारग्रहणार्थः । हकारग्रहणाभावे तस्य च अट्प्रत्याहारे श्रवणाभावे हयवरट्सूत्रे हकारो न स्यात्तदा हश्प्रत्याहारः एव न स्यात् । रामो हसति इत्यत्र हकारस्य हश्परकत्वाभावे 'हशि च' (पा.सू. ६.१.११४) इत्यनेन अतः उत्वं न स्यात् । एवमेव 'भोभगोअघोअपूर्वस्य योऽशि' (पा.सू. ८.३.१७) इति सूत्रेण रोर्यत्वं न स्यात् । एवमेव हयवरट्सूत्रे हकारग्रहणं विना लिलिहिढ्वे इत्यत्र 'विभाषेटः' (पा.सू. ८.३.७९) इत्यनेन इण्लक्षणो ढकारो वैकल्पिको न स्यात् । तस्मात् हयवरड्‌कारः सप्रयोजनकः । एवं 'हल्' इत्यत्र हकारग्रहणाभावे रुदिहि स्वपिहि श्वसिहि इत्यादौ 'रुदादिभ्यः सार्वधातुके' (पा.सू. ७.२.७६) इत्यनेन हकारस्य वल्त्वाभावेन वलादिलक्षणः इट् न स्यात् । एवं हल्सूत्रे हकारपाठं विना स्नेहित्वा स्निहित्वा इत्यत्र 'रलो व्युपधाद्धलादेः संश्च' (पा.सू. १.२.२६) इत्यनेन वैकल्पिकं कित्त्वं न स्यात् । एवं हल्सूत्रीयहकारम् अन्तरेण शलित्यस्य पाठाभावात् अलिक्षत् इत्यत्र 'शल इगुपधादनिटः क्सः' (पा.सू. ३.१.४५) इत्यनेन क्सो न स्यात् । एवमेव हल्सूत्रस्थहकारम् अन्तरा झल्प्रत्याहारे तस्य ग्रहणाभावे अदाग्धाम् इत्यत्र अ दाह् स ताम् इति स्थिते 'झलो झलि' (पा.सू. ८.२.२६) इत्यनेन सकारलोपो न स्यात् । तस्मात् हल्सूत्रेऽपि हकारः सार्थकः एव इति प्रौढमनोरमादौ प्रपञ्चितम् । एवं सम्भवति हकारोच्चारणद्वयप्रयोजनेऽपि लौकिके मम दृष्टौ हकारं द्विरुच्चार्य तस्य हरिशब्दाद्यक्षरतया चतुर्दशसूत्रे हरिस्मरणेन सम्पुटिता । इदम् अलौकिकं प्रयोजनमिति मे प्रतिभाति ।

एवं राघवेण चतुर्दशवर्षीयवनवासकाले एव सम्पूर्णा लीला कृता । यद्यपि चतुर्दशसूत्र्यां सङ्ख्याग्रहे प्रयोजनं सम्भवति शम्भोः । अन्यथा त्रयोदश एव सूत्राणि क्रियेरन् किं जातं चतुर्दशेन सूत्रेण हलादिप्रत्याहाराः रान्ताः करणीयाः अन्योऽन्याश्रयदोषवारणाय रन्त्यं हर् इति न्यासः करणीयः । तत्रत्या इयं परिस्थितिः 'हलन्त्यम्' (पा.सू. १.३.३) इति सूत्रे । वाक्यार्थबोधे पदार्थज्ञानं कारणं यथा रामो गच्छति इति वाक्यार्थज्ञाने पदयोर्द्वयोः पृथग्बोधः करणीयः अनन्तरं वाक्यार्थबोधो भविष्यति । तथैव अत्रापि 'उपदेशेऽजनुनासिक इत्' (पा.सू. १.३.२) इत्यस्मात् उपदेशे इत् इदं पदद्वयम् अनुवर्तते, तथा उपदेशे अन्त्यं हल् इत् स्यात् इत्यर्थे सम्पन्ने हल्पदस्य अर्थज्ञाने कर्तव्ये हल्सञ्ज्ञाविधायकसूत्रवाक्यार्थबोधः कर्तव्यः । तत्र च पदार्थज्ञानम् आवश्यकम् । हल्सञ्ज्ञासूत्रम् 'आदिरन्त्येन सहेता' (पा.सू. १.१.७१) इत्येवम् । अन्त्येन इता सहित आदिर्मध्यगानां स्वस्य च सञ्ज्ञा स्यात् (ल.सि.कौ.४) । एवम् अत्रापि इत्पदार्थज्ञानं जिज्ञासितम् । तच्च इत्सञ्ज्ञाविधायकसूत्रं 'हलन्त्यम्' (पा.सू.१.३.३) इत्यस्मिन् अधीनम् । तत्रापि पदार्थज्ञानाय वाक्यार्थज्ञानम् । इत्पदार्थज्ञानञ्च हल्पदार्थज्ञानाधीनम् । इत्थम् इत्पदार्थज्ञानं हल्पदार्थज्ञानाधीनं, हल्पदार्थज्ञानम् इत्पदार्थज्ञानाधीनम् । अयमेव अन्योऽन्याश्रयः । अन्योऽन्याश्रयत्वं नाम परस्परापेक्षित्वम् । तद्ग्रहसापेक्षग्रहसापेक्षग्रहविषयत्वम् अन्योऽन्याश्रयत्वम् । तद्यथा तद्ग्रह इद्ग्रहः तत्सापेक्षग्रहो हल्ग्रहः तत्सापेक्षग्रहः इद्ग्रहः तद्विषयत्वम् अन्योऽन्याश्रयत्वम् । अन्योऽन्याश्रयाणि कार्याणि न प्रकल्पन्ते । यथा नावि बद्धा नौर्न प्रचलति । इमं दोषम् आशङ्क्य भट्टोजिदीक्षितो हलन्त्यमिति सूत्रस्य आवृत्तिं कृतवान् । ध्यातव्यं यत् अष्टाध्यायीस्थम् हलन्त्यम् इति सूत्रम् असमस्तं, किन्तु आवृत्तं हलन्त्यम् इति सूत्रं समस्तम् । सप्तमीसमासे शौण्डादिगणे एतस्य अभावाद् योगविभागस्य च अप्रामाणिकत्वात् सुप्सुपा समासस्य अगतिकगतित्वात् अत्र षष्ठीतत्पुरुषोऽवयवावय-विभावरूपः सम्बन्धः । हलो हल्सूत्रस्य अवयविभूतम् अन्त्यमिति । इत्थम् एकत्र इत्पदार्थज्ञाने 'आदिरन्त्येन सहेता' (पा.सू. १.१.७१) इत्यनेन हल्पदार्थोऽपि विज्ञाप्यते, हल्सूत्रेण च इत्पदार्थः तत्रैव रन्त्यं हर् इति न्यासः करणीयो हरन्त्यम् इति वा आवर्तनीयम् । हकारस्य च प्रयोजनानि उक्तानि । अतो लशब्दस्य दृष्टप्रयोजनाभावे अदृष्टार्थं रामायणकथाच्छलेन लक्ष्मणस्मरणार्थं च । यद्यपि हकारः शषसहर् इति पठनीयो हरिर्हसति इत्यत्र विसर्गापत्तिः । 'प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने' (पा.सू. २.३.६१) इति निपातनेन यद्यपि दोषो दूरीकर्तुं शक्यते । अतो निरर्थकं हल् । 'नासूया कर्तव्या यत्रानुगमः क्रियते सूत्रकारैः' (भा.पा.सू. ५.१.५९) इति वचनेन अलम् असूयया । चतुर्दशसूत्र्यां रामायणी चर्चा । रामायणे च अनसूयायाः वर्णनम् । असूया नहि सूत्रे । दृष्टभाजमेव न फलम्, अदृष्टमपि । हकारोच्चारणेन हरिस्मरणं सीतासहितस्य श्रीरामस्य प्रतिपाद्यत्वात् । तत्र व्यञ्जनरूपेण सीतायाः, अकाररूपेण च रामस्य, लकारस्य अर्धत्वात् लकारेण अपूर्णजीवाचार्यस्य लक्ष्मणस्य च स्मरणम् । अतो बाह्यान्तरकरणानां चतुर्दशानां पावन्याः चतुर्दशभुवनख्यातरामकथायाः सूत्रतः सङ्केतितत्वात् चतुर्दशत्वे अतिविशेषः आग्रहो महादेवस्य इति प्रतीयते । इत्थं सम्पूर्णमपि व्याकरणं पाणिनीयं रामकथापरम् ।